**B.A. (Honours) Semester -II Examination, 2015**
**Sanskrit (Honours)**
**Paper : H-3**

**Time : Three Hours** **Full Marks : 40**

Questions are of value as indicated in the margin

1. "उवाच चैनं परमार्थतो हरं न वेत्सि नूनं यत एवमात्थ माम्"— केन प्रसङ्गेन कं प्रति कस्या उक्तिरियम्? सरलसुरगिरा द्वयोः वाग्विस्तरः कुमारसम्भवोक्तदिशा वर्ण्यताम्। 2+8=10

अथवा

कालिदासस्य कालं कृतिञ्चावलम्ब्य नातिदीर्घं निबन्धमेकं रचयत। 10

2. बङ्गभाषया, हिन्दीभाषया आङ्गलभाषया वा अनुवदत— 4

(क) तमातिथेयी बहुमानपूर्वया
सपर्यया प्रत्युदियाय पार्वती।
भवन्ति साम्येऽपि निविष्टचेतसां
वपुर्विशेषेष्वतिगौरवाः क्रियाः।

अथवा

(ख) पुनर्ग्रहीतुं नियमस्थया तया
द्वयेऽपि निक्षेप इवार्पितं द्वयम्।
लतासु तन्वीषु विलासचेष्टितं
विलोलदृष्टं हरिणाङ्गनासु च।।

3. प्रसङ्गप्रदर्शनपूर्वकं श्लोकमेकं संस्कृतेन व्याख्यात— 6

(क) स्वयंविशीर्णद्रुमपर्णवृत्तिता
परा हि काष्ठा तपसस्तया पुनः।
तदप्यपाकीर्णमतः प्रियंवदां
वदन्त्यपर्णेति च तां पुराविदः।

(ख) इति ध्रुवेच्छामनुशासती सुतां
शशाक मेना न नियन्तुमुद्यमात्।
क ईप्सितार्थस्थिरनिश्चयं मनः
पयश्च निम्नाभिमुखं प्रतीपयेत्।।

4. कालिदासोक्तदिशा रघुवंशस्य त्रयोदशसर्गे समुपस्थापितस्य माल्यवतो जनस्थानस्य च रूपवैचित्र्यं सरलसंस्कृतेन वर्णयत। 10

अथवा

रघुवंशस्य द्वयोः टीकाकर्त्रोः नाम लिखत। प्रयागात् सरयूं यावत् स्थानानि कालिदासोक्तदिशा सरलसुरगिरा वर्णयत। 1+9=10

5. प्रसङ्गनिर्देशपुरःसरमेकस्य श्लोकस्य व्याख्या सुरगिरा कार्या— 6

(क) नाभिप्ररूढाम्बुरुहासनेन संस्तूयमानः प्रथमेन धात्रा।
अमुं युगान्तोचितयोगनिद्रः संहृत्य लोकान् पुरुषोऽधिशेते।।

(ख) आसारसिक्तक्षितिवाष्पयोगान् मामक्षिणोद् यत्र विभिन्नकोशैः।
विडम्ब्यमाना नवकन्दलैस्ते विवाहधूमारुणलोचनश्रीः।।

P.T.O.

6. बङ्गभाषया हिन्दीभाषया आङ्गलभाषया वा अनुवदत— 4

(क) क्वचित् पथा सञ्चरते सुराणां क्वचिद् घनानां पततां क्वचिच्च।
यथाविधो मे मनसोऽभिलाषः प्रवर्तते पश्य तथा विमानम्।।

अथवा

गर्भं दधत्यर्कमरीचयोऽस्माद् विवृद्धिमत्राश्नुवते वसूनि।
अबिन्धनं वह्निमसौ बिभर्ति प्रह्लादनं ज्योतिरजन्यनेन।।